# ॥ गणेशाष्टोत्तरशतनामस्तोत्रम् ॥

विनायको विघ्नराजो गौरीपुत्रो गणेश्वरः।
स्कन्दाग्रजोऽव्ययो पूतो दक्षोऽध्यक्षो द्विजप्रियः॥ १ ॥

अग्निगर्भच्छिदिन्द्रश्रीप्रदो वाणीबलप्रदः।
सर्वसिद्धिप्रदः शर्वतनयः शर्वरीप्रियः॥ २ ॥

सर्वात्मकः सृष्टिकर्ता देवोऽनेकार्चितः शिवः।
शुद्धो बुद्धिप्रियः शान्तो ब्रह्मचारी गजाननः॥ ३ ॥

द्वैमात्रेयो मुनिस्तुत्यो भक्तविघ्नविनाशनः।
एकदन्तश्चतुर्बाहुश्चतुरः शक्तिसंयुतः॥ ४ ॥

लम्बोदरः शूर्पकर्णो हरिर्ब्रह्मविदुत्तमः।
कालो ग्रहपतिः कामी सोमसूर्याग्निलोचनः॥ ५ ॥

पाशाङ्कुशधरश्चण्डो गुणातीतो निरञ्जनः।
अकल्मषः स्वयंसिद्धः सिद्धार्चितपदाम्बुजः॥ ६ ॥

बीजपूरफलासक्तो वरदः शाश्वतः कृतिः।
विद्वत्प्रियो वीतभयो गदी चक्रीक्षुचापधृत्॥ ७ ॥

श्रीदोऽजोत्पलकरः श्रीपतिः स्तुतिहर्षितः।
कुलाद्रिभेत्ता जटिलः कलिकल्मषनाशनः॥ ८ ॥

चन्द्रचूडामणिः कान्तः पापहारी समाहितः।
आश्रितः श्रीकरः सौम्यो भक्तवाञ्छितदायकः॥ ९ ॥

शान्तः कैवल्यसुखदः सच्चिदानन्दविग्रहः।
ज्ञानी दयायुतो दान्तो ब्रह्म द्वेषविवर्जितः॥ १० ॥

प्रमत्तदैत्यभयदः श्रीकण्ठो विबुधेश्वरः।
रमार्चितो विधिर्नागराजयज्ञोपवीतवान्॥ ११ ॥

स्थूलकण्ठः स्वयङ्कर्ता सामघोषप्रियो परः।
स्थूलतुण्डोऽग्रणीर्धीरो वागीशः सिद्धिदायकः॥ १२ ॥

दूर्वाबिल्वप्रियोऽव्यक्तमूर्तिरद्भुतमूर्तिमान्।
शैलेन्द्रतनुजोत्सङ्गखेलनोत्सुकमानसः ॥ १३ ॥

स्वलावण्यसुधासारजितमन्मथविग्रहः ।
समस्तजगदाधारो मायी मूषिकवाहनः।
हृष्टस्तुष्टः प्रसन्नात्मा सर्वसिद्धिप्रदायकः॥ १४ ॥

॥ इति श्री-गणेशाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Ganesha_Ashtottara_Shatanama_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits